मध्यकायसुवेशश्च वेदपाठी सविष्टरः ।
परिग्राही हुताशस्य चपयन्तो व्रजेद्व्रजेत् ॥
यज्ञार्थं याचनां कस्य करोमि कथ्यतां मम ।
तं दृष्ट्वा सूर्य्यतेजाभमुक्तो विप्रैर्व्रजन् स च ॥
बलस्ते यज्ञनिष्पत्तिं करोति द्विजसत्तम ! ।
हेमकूटे महाशैले तिष्ठते दानवोत्तमः ॥
सर्व्वज्ञोऽपि महामायी वञ्चनाय तदा गतः ।
मोहिनीं जपमानस्तु विद्यां परमसिद्धिदाम् ॥
विचित्रं दनुराजस्य पुरं सर्व्वपुरोत्तमम् ।
प्राविशद्देवं वेदात्मा पठमानो जनार्द्दनः ॥
दानवन्तु पुरं रम्यं जानासि त्वं गृहोत्तम ! ।
द्वारं गतोऽसुरेन्द्रस्य कुर्य्यां प्राध्ययनं तदा ॥
द्वारपालो वदत्येवं श्रुत्वा वेदध्वनिं शुभम् ।
पुराणि रत्नानि शुभं ददामि याचतां वर ! ॥
इष्टं दानं द्विजश्रेष्ठ ! दुर्लभञ्च महामते ! ।
तेनोक्तं दर्शनं द्वाःस्थ दीयतां दनुसत्तमे ॥
तदा स पूर्व्वमादिष्टः प्रेषयामास तं नृपम् ।
बलिनं बलसम्पन्नं दानवं सुरमर्द्दनम् ॥
दानोद्यतकरो भद्रं दृष्ट्वा प्रीत्यावभाषत ।
किमायातो भवांश्चात्र कार्य्यं विप्र ! तदुद्दिश ॥
मोहिनीं जपमानस्तु वदते द्विजकेशवः ॥
ब्रह्मोवाच ।
अहं संप्रेषयामास विद्धि मां कश्यपात्मजम् ।
यज्ञाः सेन्द्रैः समारब्धा ऋषिभिश्चासुरा-
धिप ! ॥
तस्य निष्पत्तये नाथ ! आगतोऽहं तवान्ति-
कम् ।
दानं मे दीयतां राजन् ! सिध्यते येन तन्मखः ॥
बल उवाच ।
येन संसिध्यते यज्ञो देवारब्धो द्विजोत्तम ! ।
तथा चाहं धनं दारान् शिरमद्य ददामि ते ॥
ब्रह्मोवाच ।
येन संसिध्यते यज्ञो देवानामसुराधिप ! ।
तद्देयं तच्च आदिष्टं सत्यमत्रावयोरपि ॥
बल उवाच ।
याच्यतां येन ते कार्य्यं सत्यं विप्र ! ददामि ते ।
संस्तुत्य मोहिनीं विद्यां वदते द्विजसत्तमः ॥
ब्राह्मण उवाच ।
न मे धनैः स्वदारैर्वा न भूम्या गजवाजिभिः ।
रत्नैः कार्य्यं महाबाहो ! देवयज्ञोऽसुरा-
धिप ! ॥
येन निष्पाद्यते यज्ञः सुखदश्च दिवौकसाम् ।
तमहं याचयिष्यामि दीयतां तद्व्रतं तव ॥
एतत् कार्य्यं मम भद्रं ऋषीणाञ्च विशेषतः ।
देवार्थं तव कायेन सिध्यते तन्मखोत्तमः ॥
तदा दत्ता तनुस्तेन दानवेन महात्मना ।
विष्णुनापि स्वचक्रेण शिरस्त्वभिहतोऽसुरः ॥
प्राकृतं देहमुत्सृज्य दिव्यकायस्त्वभूत्तदा ।
तस्यावयवसंजाता वज्राद्या रत्नजातयः ॥
लोचने सुरतेजांसि पद्मरागाणि चाभवन् ।
विशुद्धपात्रदानेन कायो रत्नाकरोऽभवत् ॥"
इति देवीपुराणे ४७ अध्यायः ॥

व(व)लक्षः, पुं, धवलः । इत्यमरः ।१।५।१३॥ बलतेः क्विप् बलं अक्षत्यस्मिन् घञ् बलक्ष इति कष संयोगवान् । इति रायमुकुटः ॥ अवलक्षते इति वलक्षः घञ् अकारलोपः । इति स्वाम्यादयः ॥ एतन्मते अन्तःस्थवकारादिः ॥ (यथा, माघे । ६ । ३४ ।
"द्विरददन्तवलक्षमलक्ष्यत
स्फुरितभृङ्गमृगच्छविकेतकम् ॥")

बलजं, क्ली, (बलात् जायते इति । बल + जन + ड ।) क्षेत्रम् । पुरद्वारम् । इत्यमरः ।३।३।३१॥ शस्यम् । (धान्यराशिः । इति वैजयन्ती ॥ यथा, माघे । १४ । ७ ।
"त्वं समीरण इव प्रतीक्षितः
कर्षकेण बलजान् पुपूयता ॥")
युद्धम् । इति मेदिनी ॥ बलजन्ये, त्रि ॥

बलजा, स्त्री, (बलात् बलकृतसाहसयुद्धादिकात् जायते या । बल + जन + ड + टाप् ।) वरयोषा । यूथी । इति मेदिनी । जे, २६ ॥

बलती, स्त्री, प्रासादोपरिमण्डलिका । इति पुराणम् ॥

बलदः, पुं, (बलं ददातीति । बल + दा + कः ।) जीवकः । इति राजनिर्घण्टः । पौष्टिककर्म्माङ्गहोमाग्निः । यथा । पौष्टिके बलदः स्मृतः । इति तिथ्यादितत्त्वम् ॥ (वृषभः । यथा, कथासरित्सागरे । ३७ । १५३ ।
"अन्येद्युः प्रणयक्रीड़ायाजाच मम सूचकम् ।
गलेऽबध्नादहं दान्तस्तत्क्षणं बलदोऽभवम् ॥")
बलदातरि, त्रि ॥ (यथा, ऋग्वेदे ।३।५३। १८ ।
"बलं तोकाय तनयाय जीवसे त्वं हि बलदा
असि ॥")

बलदा, स्त्री, (बलद + टाप् ।) अश्वगन्धा । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा,—
"गन्धान्ता वाजिनामादिरश्वगन्धा हयाह्वया ।
वराहकर्णी वरदा बलदा कुष्ठगन्धिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

बलदीनता, स्त्री, (बलस्य दीनता ।) ग्लानिः । इति हेमचन्द्रः ॥

बलदेवः, पुं, (बलेन दीव्यतीति । दिव + अच् ।) बलरामः । तत्पर्य्यायः । बलभद्रः २ प्रलम्बघ्नः ३ अच्युताग्रजः ४ रेवतीरमणः ५ रामः ६ कामपालः ७ हलायुधः ८ नीलाम्बरः ९ रौहिणेयः १० तालाङ्कः ११ मुषली १२ हली १३ सङ्कर्षणः १४ सीरपाणिः १५ कालिन्दीभेदनः १६ बलः १७ । इत्यमरः । १ । १ । २४ ॥ रुक्मिदर्पः १८ मधुप्रियः १९ हलधरः २० हलभृत् २१ तालभृत् २२ सौनन्दी २३ गुप्तवरः २४ संवर्त्तकः २५ बली २६ । इति शब्दरत्नावली ॥ (यथा भागवते । ९ । ३ । ३३ ।
"तद्गच्छ देवदेवांशो बलदेवो महाबलः ॥")
अस्य ध्यानम् ।
"बलदेवं द्विबाहुञ्च शङ्खकुन्देन्दुसन्निभम् ।
वामे हलायुधधरं मुषलं दक्षिणे करे ॥
हालालोलं नीलवस्त्रं हेलावन्तं स्मरेत् परम् ॥"
इति कश्चिन्निबन्धः ॥
(अयं हि शेषसर्पस्यांशावतारः । यथा, महाभारते । १ । ६७ । १५१ ।
"शेषस्यांशश्च नागस्य बलदेवो महाबलः ॥"
नाम्नामस्य कारणानि बलभद्रशब्दे द्रष्टव्यानि ॥)
वायुः । इति मेदिनी । वे, ६२ ॥

बलदेवा, स्त्री, त्रायमाणौषधिः । इति मेदिनी । वे, ६२ ॥ (गुणादयोऽस्यास्त्रायमाणाशब्दे ज्ञातव्याः ॥)

बलप्रसूः, स्त्री, (प्रसूते इति प्रसूर्जननी । बलस्य बलदेवस्य प्रसूः ।) रोहिणी । बलराममाता । इति शब्दरत्नावली ॥

बलभद्रः, पुं, (बलं भद्रं श्रेष्ठमस्य । यद्वा, बलमस्यास्तीति बलः । अर्श आद्यच् । बलो बलवानपि भद्रः सौम्यः ।) बलदेवः । इत्यमरः ।१।१।२४॥ अनन्तः । बलशाली । इति हेमचन्द्रः ।२।१३९॥ लोध्रः । इति शब्दचन्द्रिका ॥ गवयः । इति राजनिर्घण्टः ॥ बलदेवस्य नाम्नां कारणानि यथा,—
"कृतं निरूपितं नाम्नां कनिष्ठस्य यथाश्रुतम् ।
ज्येष्ठस्य हलिनो नाम्नः सङ्केतं शृणु मन्मुखात् ॥
गर्भसङ्कर्षणादेव नाम्ना सङ्कर्षणः स्मृतः ।
नास्त्यन्तोऽस्यैव वेदेषु तेनानन्त इति स्मृतः ॥
बलदेवो बलोद्रेकाद्धली च हलधारणात् ।
शितिवासो नीलवासात् मुषली मुषलायुधात् ।
रेवतीसहसम्भोगाद्रेवतीरमणः स्वयम् ॥
रोहिणीगर्भवासात्तु रौहिणेयो महामतिः ।
इत्येवं ज्येष्ठपुत्त्रस्य श्रुतं नाम निवेदितम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १३ अध्यायः ॥
विष्णुपूजनोक्ताष्टदलपद्मस्थयोगिविशेषः । यथा,
"सर्व्वत्र मण्डलं कार्य्यं वासुदेवस्य पूजने ।
एवमेव नृपश्रेष्ठ ! निष्फलं चान्यथेतरत् ॥
बलभद्रश्च कामश्च अनिरुद्धस्तदुद्भवः ।
नारायणस्तथा ब्रह्मा विष्णुः षष्ठः प्रकीर्त्तितः ॥
नरसिंहो वराहश्च योगिनोऽष्टौ प्रकीर्त्तिताः ।
पूर्व्वाद्यष्टदलेष्वेतान् वर्णतो मन्त्रतः पृथक् ॥
पूजयेत् कर्णिकामध्ये वासुदेवन्तु नायकम् ।
विमला नायिका तस्य वासुदेवस्य कीर्त्तिता ।
बलभद्रमुखानान्तु योगिन्यः शृणु पार्थिव ! ॥
आदावुत्कर्षिणी ज्ञेया ज्ञाना पश्चात् क्रिया
परा ।
योगा प्रह्वा तथेशानी अनुप्राती तथा स्तनी ॥
सर्व्वाश्चतुर्भुजाः प्रोक्ताः शङ्खचक्रगदाधराः ।
योगिन्यो बलभद्रन्तु कामं विधियुते तथा ॥
विधे रूपन्तु पूर्व्वोक्तं हलञ्च मुषलन्तथा ।
शङ्खचक्रञ्च धत्ते स गदां पार्श्वस्थितान्तथा ॥"
इति कालिकापुराणे ८२ अध्यायः ॥
(पर्व्वतविशेषः । यथा, भागवते । ५।२०।२६।
"एतेषां वर्षमर्य्यादा गिरयो नद्यश्च सप्त सप्तैव ।
ईशान उरुशृङ्गो बलभद्रः शतकेसरः सहस्रस्रोतो देवपालो महानस इति ॥")